Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 2 | ISSN : 2582-0095

# इकोगुणवृद्धिति परिभाषा शब्दप्रमाण्यश्च विवेचनम्



डॉ. जगदीश प्रसाद जाटः
(वैयाकरणशास्त्र विशारदः) प्राचार्य,
गुरुकुल शिक्षा समिति, मौजमाबाद,
जयपुर, राजस्थान, भारत।

**सारांशः**– भिन्नविषयत्वेन तदनुपपत्तेः एवं चानिको इत्यस्य गुणविध्यर्थमेतत्स्यात्। एवम् अलोन्त्यपरिभाषाप्यनुगृहीता भवति। न चानयै व दिशा पुगन्तलघूपधगुणस्याप्यनिकिविधानार्थत्वसंभवेन नियमार्थत्वानुपपत्तेः मिदन्त्यव्यञ्जनस्यापि तेनैव सिद्धत्वात्सुतरामानर्थक्यमेवायातमिति वाच्यम् । पुग्यन्तो लघो उपधेति तत्पुरूषाड़ीकारेण व्यञ्जने प्रवृत्तेः । न चास्य विधित्वे सकलगुणवृद्धिविधिषु इक पदोपस्थानस्य नियमत्वसंपन्नये कैयटेनोक्तत्वान्न मिदेर्गुणोऽन्त्यविध्यर्थ इति वाच्यम्। विधिपरिभाषा चेति पक्षे कैयटेन तथाभिधानात्। केवलविधित्वपक्षेऽन्त्यविध्यर्थत्वे बाधकाभावात्। यद्येवमनिगर्थता संभवात् पुगन्तेत्यपि नियमार्थ स्यादिति चेत्। न तत्पुरूष पक्षे तत्संभवस्योपकृतत्वात्। बहुव्रीहिपक्षेऽपि समयान्वयापनायामित्यादि निर्देशात्पुगन्तगुणादेरनिको प्रसंगात्।

**मुख्यशब्दः**– इकोगुणवृद्धिति, परिभाषा, शब्दप्रमाण्यश्च, विवेचनम्।

"इकोगुणवृद्धिति परिभाषा अधिकारसूत्रं विधिसूत्रं वेति विवेचनम्"इको गुणवृद्धी किमयमधिकार आहोस्विद्यत्र कुत्राप्यवस्थितस्येको गुणवृद्धिविधायक: स्वतन्त्रो विधिः अथवा तत्र शास्त्रविहितयोर्गुणवृद्धयोः स्थानिनियमार्था: परिभाषा अथवा विधिः, परिभाषा च। अत्र न परिभाषेयं नाधिकारः, स्वल्पप्रयोजनत्वे सत्यसंयुज्यनिर्देशादिति। तत्रेदं चिन्त्यं किमपेक्षालक्षणस्य लौकिक स्याधिकारस्याभावः साध्यते। किञ्चास्वरितत्वनिबन्धनस्य शास्त्रीयस्य भाव इत्यत्र व्यभिचारः । अस्य हन् इत्यत्रैव स्थान्याकाङ्क्षयाधिकार इति हेतुरस्ति, साध्यं च नास्तीति।[1] द्वितीये तु छे[2] चेत्यत्र व्यभिचारः । इदमपि त्रिसूत्री मात्रेऽनुवर्तते। एवं हनो वध लिडि[3] लुडि[4]. चेत्यत्रापि। एतद् हि त्मनेपदेष्वन्यतरस्यामित्यत्रैवाधिकृतम्।

न चात्राप्यपेक्षयैव सम्बन्धो न स्वरितत्वेनेति वाच्यं तेन विनापि वाक्यार्थपर्यवसानात्। अन्त्ये आत्मनेपदेष्वित्यनेनैव निमित्ताकाङ्क्षापूरणात् । आद्येऽपि विनैव निमित्तं विधानोपपत्तेः। आदेच् इतिवत्। तदुक्तम् -

अनैमित्तिकमात्वं शिति तु प्रतिषेध इति। तथा चास्यापि विधित्वमनिमित्तकमेवाशक्यते। यथा वा हेताविति । तद् हि स्वर्यत अकर्तर्यण इत्यत्र कथञ्चिदपेक्षा संभवेऽपि षष्ठी हेतुप्रयोग[5] इत्यत्रोपस्थित्यर्थः । अथ मतं केवलाधिकारत्वाभावः साध्यः अयं तु शेष इतिवल्लक्षणंवाधिकारश्चेति चेत् । एवं सत्यसंयुज्येत्यादिविशेषणवैयर्थ्यात् संयुज्यनिर्दिष्टैकैवल्याभाव प्रयुक्त विशिष्टाभावसत्त्वेन व्यभिचाराभावात्। किञ्चैवमपिद्वेतंधिके आर्धधातुक इत्यत्र व्यभिचारः।

एतद् हि हनो वध लिडि. अस्तेर्भू[6] ब्रुवो वचि[7,8] चक्षिङ्.[9,10] ख्यामिति चतुः सूत्राणामेवाधिकृतमन्यत्र प्रयोजनाभावात् । अजे विभावेत्वघञ्योरिति पर्युदासेनैपवार्थः धातुकलाभात्।

एकाचो[11] द्वे प्रथमस्येत्यपि 'लिटि धातोरनभ्यासस्य[12] 'सन्यङो[13] 'चङी ति[14] चतुः सूत्रामेव सर्वमधिकृतम् अजादेरित्यत्र तु एकाचो वे इति। पूर्वोऽभ्यास इत्यत्र तु वे इति। उभेऽभ्यस्तमित्यत्र तु अपेक्षावशादेवोपस्थितिः। अत एव हरदत्ते नोदाहृतं प्रयोजनत्वेन । एकाच इत्यष्टसूत्र्याम् आर्धधातुक इति चतुः सूत्र्याम् एवमिको गुणवृद्धी इत्यपि त्रिसूत्र्यामधिकारोक्तः। अन्यथा प्रत्ययाधिकारान्यूनानामपि तदन्यतया स्वल्पप्रयोजनत्वादनधिकारत्वं स्यात् । अथ सुतरामल्पत्वं त्रिधेव विश्रान्तं ततो न्यूनस्यासंभवादिति चेन्न। उपसर्गा दृतीत्यस्य द्विसूत्री मात्रानुवर्तिनोऽपि च स्वल्पप्रयोजनत्वेनोदाहरणादन्यथा तद्यवच्छेदापत्तेः साध्येविशेषणावतारायोगात् । ततश्चैतदपेक्षयाधिकप्रयोजनत्वादिको गुणवृद्धी सन्नविशेषणसिद्धो हेतुः । अथ केवलाधिकारे तु स्वल्पतोच्यते इति मतम्।

तदपि मन्दम् एतावद् हि त्रिसूत्रीमात्रप्रयोजनकत्वं स्वल्पप्रयोजनत्वमिति तव विवक्षितं पर्यवसितम् । तत्र किमन्योऽपि केवलारम्भे ईदृगस्ति न वा । आद्ये तत्रैव व्यभिचारः । अन्येत्वसंयुज्यनिर्देशादिति व्यर्थम् ।

अधिकप्रयोजनस्वल्पपदेनैव निरासात् संयुज्यनिर्दिष्टेऽधिकारे स्वरो विधायकत्वेन कैवल्यविशेषणाभावप्रयुक्तस्य विशिष्टाभावस्य साध्यस्योपसर्गादृतीत्यादौ सत्वेन व्यभिचारावारकत्वाच्च ।

जरन्तस्तु असंयुज्यनिर्देशादित्येवहेतुः असंयोगश्चोपस्थित्युद्देश्यदेशेन सह विवक्षितः स्वल्पप्रयोजने सति केवलशास्त्रीयाधिकाराभावः साध्यः । तत्रास्येत्यत्र व्यभिचारवारणाय सत्यन्तमुपसर्गादृति धाताविति वारणाय केवलेति। तत्र विधित्वस्यापि सत्वेन विशिष्टाभावसंभवात् । प्रकृते च केवलत्वाल्पप्रयोजनत्वयोः संभवेऽपि शास्त्रीयाधिकारत्वाभावेन विशिष्टाभावसिद्धिरित्याहुः। तदपि आर्धधातुके एकाचो द्वे[15] इत्यादौ प्रागुक्तव्यभिचारणैव परास्तम् ।

किञ्चेको गुणवृद्धीति पक्षीकृते इगित्यस्य शास्त्रीयाधिकारत्वस्य स्थितत्वात् साध्ये बाधः । यत्तु समुदाये शास्त्रीयाधिकाराभावः साध्यः । गुणवृद्धिग्रहणं तु न धात्वित्यादौ लौकिकेनाधिक्रियते न शास्त्रीयेणेति समुदाये शास्त्रीयाधिकाराभावात् ततो न बाध इति। तत्र व्यतिरेकव्याप्तावार्धधातुक इत्यादौ व्यभिचारात् । किञ्च कैवल्याभाव[16]साधनेनार्थान्तरता स्यात् । ततश्चायमधिकारो विधिः परिभाषा चेत्यपि प्रसज्येत। नैकान्ततोऽधिकारत्वाभावः। अत एव हरदत्तेनाधि कारत्वाभावमात्रं साध्यं निर्दिष्टम् असंयुज्यनिर्देशमात्रं च हेतु उक्तः। न च यथा श्रुतेऽस्येत्यादौ व्यभिचारः[17] भवानवबोधात् ।

अयं हि भावः-यद्ययमधिकारः स्यात् तदास्योत्तरसूत्रेषु विधेयसमर्पकतया न्वयोवाच्यः । न च तत्र गुणवृद्धी। विधेयेनेति श्रुतेस्तन्निषेधो विधेयशरीरं निषेधोऽपि परार्थ एव निर्दिश्यते न स्वतन्त्रः । ततश्च पारार्थ्यं विशेषेते निषेधेन संयुज्यैव निर्दिशेत् । सर्वस्य द्वे पूर्वत्रासिद्धमितिवत् ।

न तु विधेयशरीरं किञ्चिदसंयुज्यापरं संयुज्येति वैरूप्ये हेत्वभावात् । प्रत्ययः परश्च आधु दात्तश्च अनुदात्तौ सुप्पितािविति पारार्थ्याविशेषेऽप्यसंयुज्यनिर्देशो विधेयभेदात् । यत्त्वेकमेव विशिष्टं विधेयं न तदसंयुज्य निर्दिश्यते। तदुक्तं तेनैव । अधिकारे हि का गुणवृद्धी

न धातुलोप इति संयुज्यैव निर्दिशेदिति। अत्र च नेत्यन्तो योगविभागः। ततो धातुलोप इत्यादि पृथक् पाठमाश्रित्येको गुणवृद्धीति विधेयशरीरमधिकार्यं संयुज्यैव निर्दिशेदित्यर्थः[18] । तदयं हेत्वर्थः केवलपारार्थ्यविधेयैकदेशीतने च तादृशे सति तादृशेन विधेयैकदेशेनासंयुज्यनिर्देशादिति। व्यतिरेकी[19] चायमधिकारत्वं च लौकिकशास्त्रीयसाधारणं केवलं तदभावः साध्यः । स चेक्पदे गुणवृद्धिपदे च संङच्छते । अत एव स्वस्तित्वादित्यपि प्रथमहेतोगुणवृद्धिपदे लौकिकाधिकारेऽपि न बाधः। केवलाधिकारत्वाभावस्य तत्रापि सत्वात् । एतेनैतदपि परास्तम् ।

यदाहुः शास्त्रीयाधिकारत्वस्याभावोऽत्र साध्यः न लौकिकस्य तस्य न धातुलोप इत्यादाविष्टत्वेन बाधापत्तेः। तत्र स्वरितगुणविशिष्टत्वे सत्युत्तरत्रोपस्थित्यभावे साध्येऽस्वरितत्वादिति हेतुः साध्यविशिष्टः । अत्र हि विशिष्टाभावो न विशेष्याभावादुमयाभावाद्वा । उत्तरत्रोपस्थितेरीकारात्। किंतु विशेषणाभावादेव वाच्यः। तथा च स्वरितत्वाभावेनैव स्वरितत्वाभावः साध्यत इति स्फुटैव साध्यः विशिष्टतेति। मदुक्तसाध्यस्य लोकशास्त्रसाधारणा नुवृत्त्यभावस्यस्वरितत्वहेतोश्चात्यन्तभेदात् । किञ्च विशेष्ये मात्रसत्वेऽपि विशेषणावच्छिन्नविशेष्यस्यासत्वेन विशिष्टाभावात् साध्यास्वरितत्वाभावमात्रे हेतुर्भिन्न एवेति न साध्यावैशिष्ट्य शंकाप्यस्तीत्यन्यत्र विस्तरः ।

यच्च समादधुः। अस्वरितशब्देन स्वरितप्रतिज्ञाभावे विवक्षितः तस्य च भिन्नत्वान्न साध्याविह विशिष्टतेति । तदप्यसत्। किमत्रापि स्वरितत्वप्रतिज्ञाभावः साध्यः स्वरूप[20] सत्स्वरितत्वाभावो वा । आद्ये तदवस्थैव साध्याविशिष्टता द्वितीये तु सिचि वृद्धिदृजेर्वृद्धि[21] रित्यादौ व्यभिचारे वृद्धिशब्दो हि वस्तुगत्या स्वरितः उत्तरत्र चोपतिष्ठते। अपेक्षावशादिति स्वरितप्रतिज्ञाभावोऽप्यस्वरितत्वे सत्युत्तरत्रोप स्थानाभावरूपं साध्यं नास्तीति । अथ मतं स्वरितत्वहेतुकोपस्थानाभावः साध्य इति। तर्हि इक्पदे हेतोरसिद्धिः साध्ये च बाधः ।

गुणवृद्धिग्रहणं च सिद्धसाधनं समुदायपक्षीकरणेऽपि भागे सिद्धिबाधसिद्ध साधनानतिवृत्तिः । समुदायस्तत्वान्तरमिति चेत् । मा भूत् । तत्राधिकारत्वमवयवयोः तु तदभावो न साधितः स्यान्न तच्चैकाचो द्वे प्रथमस्य[22] सर्वस्य द्वे इति चात्समुदायस्यास्वरितत्वेनानाधिकारत्वेप्यवयवयोरधिकारत्वं दुर्वारत्वं दुर्वारमित्यलं तर्ककान्तारसांचारव्यसनेन कश्चित् त्वाह। यद्ययमधिकार:[23] स्यात्पुनर्गुणवृद्धि ग्रहणमनर्थकं स्यात् । अनुवृत्त्यैव तत्रारम्भात् ।

नचआनन्तर्यात् गुणग्रहणमिति वाच्यम्। समुदायापेक्षायामानन्तर्य न्यायानवतारात् । अवयवापेक्षायामपि गुणग्रहणमनर्थकमिति। तन्न।

इको गुणवृद्धिरित्यस्येतावत्युक्ते विनाकाङ्क्षत्वान्निषेधो गुणस्य न लभ्येत । न च स्वरितत्वमसामर्थ्यात् गुणानुवृत्तिः। वृद्धावपि तथा सुवचत्वात् । अन्यवचनाच्चकारकरणाच्चासंबंध इति चेत् गुणोऽपि । अधिकारत्वे पुनर्गुणवृद्धिग्रहणं स्यात् । अन्यथा हि बभूवतुरित्यादावभ्यासस्यापि निषिध्येत् । न च वचनानर्थक्य विधिर्भवन्तीति। कि च प्रत्याख्यानपक्षेऽपि सुचरितार्थत्वात्[24] । यदपि प्राचो व्याचख्युः। अस्वरितत्वादिति हेतौ केवलाधिकारत्वाभावः साध्य इति । असंयुज्यनिर्देशादित्यस्य तु साध्यं केचिदूचुः ।

अपरत्र न चतुर्थादियोगसंबंधानू सत्युत्तरत्रसूत्रानुवृत्तिमात्रप्रयोजनको न भवत्युक्तहेतोः अस्येत्यादिवत्। व्यतिरेके[25] इक्पदवदिति। तदपि प्रागुक्तार्थान्तरशास्त्रम्।

ननु मा भून्नामाधिकारस्तथापि परिभाषात्वमेव कुतः विधेयकार्यिणो निर्देशात्संभवति । स्वातन्त्र्ये पारतन्त्र्यस्यान्याय्यत्वच्चाद्विधिरयमस्तु । एवं तर्हि गुणवृद्धयधिकारे पुनर्गुणवृद्धिग्रहणवृद्धिग्रहणात्र विधिः अन्यथानुवर्तमानगुण वृद्धिग्रहणाभ्यासमेवेको[26] गुणवृद्धिविधानोपपत्तेः पुनस्तदुपादानमनर्थकं स्यात् ।

यद्यपि प्रकृतं संज्ञापरमिहत्वनुवृत्तिसामर्थ्यात् संज्ञिपरं भविष्यतीति चिरन्तनःपन्थाः । अत्र केचित् । अनुवर्त्तमानगुणवृद्धिपदयोः संज्ञापरत्वान्मा तत्परत्वं भूदिति प्रत्युतसंज्ञिलाभार्थमेव गुणवृद्धिग्रहणं स्यात् । न चोक्तमनुवृत्तिसामर्थ्यमिहापि संज्ञा विधाने नै वानुवृत्त्युपपत्ते रिति वदन्ति । यत्तु समादधति संज्ञापदयोरप्यनुवर्तमानगुणवृद्धिपदयोरिक् इति षष्ठ्यन्तसमभिव्याहारे संज्ञिपरत्वमेव न्याय्यम्।

यत्र संधिक्रियमाणस्य संज्ञापरस्य प्रथमान्तसमभिव्याहारः तत्र संज्ञापरसामर्थ्यादित्यस्य हलन्त्यमित्यादिषु[27] यत्र तु तदभावस्तत्र संज्ञिपरतैव यथा तस्यैव तस्य लोप इत्यत्रेति । तदसत् । तथा हि । न तावदयमर्थो वाचनिकः[28] । तादृशवच नाभावात् नाथ्यानु मानिकोःव्याप्त सिद्धे :। कथञ्चित् षष्ठ्यन्तसमभिव्याहारविवक्षायाम् अदसो मात्[29] षः प्रत्ययस्ये[30] त्यादौ व्यभिचारात् । कार्यित्वेनेति चेत् । उञ् इत्यादिषु व्यभिचारे नापि यत्र संज्ञिपरत्वं तत्र कार्यित्वेन षष्ठ्यन्तसमभिव्याहारविवक्षायामित्यपि। तस्य लोप इत्यत्र व्यभिचारात् । तस्य ग्रहणं समुदायलोपार्थं न कार्यिनिर्देशार्थमिति स्थितत्वात् काऽपि समानाधिकरणषष्ठ्यन्तसमभिव्याहाराकाङ्क्षायामिक[31]इत्यत्रैवासंभवः । एतेन यत्र प्रथमान्तसमभिव्याहाराभावस्तत्र संज्ञिपरतैवेत्यपि परास्तम् ।

उञ इत्यादावेव व्यभिचारात् । यत्र प्रथमान्तसमभिव्याहारस्तत्र संज्ञापर तैवेत्यपि परश्चेत्यस्य परिभाषात्वपक्षे संज्ञापरानुवर्तमान प्रत्ययग्रहणस्य प्रथमांतसमभिव्याहारेऽपि संज्ञिपरत्वदर्शनात्। यथोक्तं वृत्तौ परश्च भवति धातोर्वा प्रातिपदिकाद् वा यः प्रत्ययसंज्ञ इति । ननु लिजवतीयं परिभाषा प्रत्ययसंज्ञा वास्यालिङ ततश्च यत्र प्रत्यय इति संज्ञाविधेयं तथा श्रूयते। तत्र परश्चेत्युपस्थितमिष्टव्यमिति। एवञ्च नायं संज्ञिपरत्वमनुभवति । व्यर्थोऽयमस्याव्याप्ते तूपन्यासः। प्रकृतेऽनुपयोगात्। न हीक इत्यत्र प्रथमान्तसमभिव्याहारो न चात्र संज्ञापरत्वं सिसाधयिष्यति । तस्मात्संज्ञाविधायकतयैवोपपत्तेरयुक्तमनुवृत्तिर्सामर्थ्यम् । प्राज्ञाः चक्षुषस्त्वाह । संज्ञापरयोर्गुणवृद्धयोरनुवृत्तौ न धातुलोप इत्यादौ संज्ञैव निषेध्या स्यात् । तच्चायुक्तम् । न हि तत्र परत इकः सत्यामपि संज्ञायां कश्चिद्दोषः ।

अतस्तत्र सामर्थ्यात् संज्ञिनोरेव प्रतिषेध आस्थेयः एवञ्च पूर्वसूत्रेण वैरूप्यायानयोः संज्ञिपरत्वमेव भविष्यति । तत्रेयं योजना-इह तु संज्ञिपरं भविष्यति कुतः अनुवृत्तिसामर्थ्यात् । उत्तरत्रेति शेष इति। तदप्यसत् । अध्याहारापत्तेः । किञ्च वैरूप्यमेव हेतुः तर्हि पूर्वेण वैरूप्याय संज्ञापरत्वमेवास्तु। न चात्र परसाहचर्य[32] नियामकं पूर्वस्य संज्ञातविरोधिन उपक्रमस्थस्य बलीयस्त्वात् । असतिबाधा वतारेत्ययोगात् । अत एव उच्चैः ऋचा क्रियत इति विध्युद्देशगतमष्टगादिपदं वेदपदसमभिव्याहतोपक्रमस्थ ऋगादिपद प्रक्रमानुरोधाद् वेदपरं न मंत्रमात्रपरमिति स्थितम्। एवं स्थिते यदि न धात्वित्यादौ संज्ञापरत्वेऽवश्यं वा धातुलोपे आर्धधातुके तन्निमित्तस्येको गुणवृद्धिशास्त्राभ्यामदेड.दैचा विवेकोऽपि प्राप्नुवन्ति।

तत्र धातुलोपार्धधातुकविषये गुणवृद्धिशास्त्रेणेको विधानं निवर्त्यते। संज्ञेयत्वं इत्यर्थोपपत्तेः किं कृतं भवति । इकोप्यत्र गुणवृद्धिसंज्ञा क्रियत इति ।

ननु आन्तरतम्यादिक: स्थाने इक एव गुणवृद्धी स्यातामिति न दोषः सत्यामपि संज्ञायां न चास्ति किञ्चिदिकः संज्ञाविधाने प्रयोजनमपीति चेत् । नाविधानसामर्थ्यादनन्तरतम इकः स्युरिति। निषेधस्य संज्ञायाश्चोपयोगात् । किञ्च अस्य संज्ञाविधिपरत्वे गुणवृद्धिविधिरिक पदोपस्थानाभावादनिकोऽपीको यथा स्युरितीकः संज्ञाविधिर्भविष्यति। अथ मा भूत्संज्ञानिषेधो मा च भूत् गुणवृद्धिग्रहणं सज्ञिपरं तथापि संज्ञापरत्वाद्वर्तमानमपि अयोग्यत्वान्निषेधे तन्नापेक्षिष्यते किंत्वदेड.दैचावेव सन्निहिती योग्यौ वेत्यपेक्षावशात्संभवे तेन धात्वंशलोपनिमित्ते आर्धधातुके तन्निमित्ता अदेड.दैचो न भवन्तीत्यर्थोपपत्तेः सिद्धमिष्टम्।

न च गुणवृद्धिशब्दाभ्यां तद्रूपेण चैषामुपस्थितौ कश्चिद्विशेषोऽस्त। इक इत्यनुवृत्येव इक् लक्षणत्वाभावात्। न च संज्ञाया एव विधेयत्वेन प्राधान्यात्सम्बन्धो न्याय्यो न गुणभूतयोः संज्ञिनोरिति वाच्यम् । प्रधाने बाधादत्रगावतरणन्यायेन संज्ञिन एव । वस्तुतस्तु संज्ञयेव प्रधानं विधेयत्वान्न संज्ञानूद्यत्वादिति वक्ष्यते। अथवा किं न एतेनानुवृत्तिव्यसनेन नान्तः पादमिति पाठे यथैडो यथैडो यत्प्राप्तं तदविशेषेण निषिध्यते एवमिहापीको यत्प्राप्तं तद् धातुलोप आर्धधातुके न भवतीत्यर्थेऽप्युपपद्यतेऽर्थवत्वं कथञ्चित् ।

किं कृतं भवति लो लुवो दीप इत्यादौ गुणवदियडुवङ् यणादयोऽपि मा भूवन्निति तथा च सति गुणवृद्धी तन्निषिध्येयातां पुरस्तादपवादा[33'] इति न्यायात् । नन्विदमनिष्ट: स्यादिति चेन्न। न हि प्रयोजनवति प्रमाणमुपरूणद्धि [34]

यथा कथञ्चिदर्थवत्वोपपत्तौ सामर्थ्यो नोपपद्यते। तस्मान्नोपवर्णितं सामर्थ्यमस्तीत्यपरस्तु संज्ञाविधिरेव । नन्विदं खल्वपि भूयः सामानाधिकरण्यमेक विभक्तित्वंवदयोश्चैतद्भवति कयोः संज्ञासंज्ञिनो च विशेषणविशेष्ययोर्वेति भाष्याद्वैयधिकरण्ये कथं संज्ञात्वप्रसंग इति चेत् यथोज इत्युपक्रमेव । पक्षतुल्यमेतदिति चेत् । न ह्यस्यायमर्थः सामानाधिकरण्य एव संज्ञात्वमिति किन्तु सति सामानाधिकरण्ये संज्ञात्वं विशेषणत्वं संभवति नान्यदिति । अत एव संज्ञासंज्ञिनोर्भेदाभेदविवक्षया षष्ठीप्रथमे उभेऽपि भवतः । आदेच् वृद्धिः आदैचां वृद्धिरिति संज्ञेति। विपर्ययोऽपि दृश्यते स्वंभूयमितित्यादौ संज्ञायाः षष्ठीसंज्ञिनः प्रथमेति लोकेप्यनियमो दृश्यते। अस्य गौरिति सनाम अयं गौः गोपदस्यायमर्थ इति। अत्रापीक इति प्रथमाबहुवचनमेव किं न स्यादिति[35] । तत्र ऐजित्यादिवदिगित्येव लाघवाय निर्देश्यं स्यात्। असंदेहाय वा हलोऽनन्तरा इत्यादौ तु बहुवचनं संज्ञाया अनेकसमावेशित्वख्यापनाय। अत एव षष्ठ्याः प्रथमया विपरिणामः कल्पयिष्यत इत्यप्यपास्तम् ।

षष्ठ्यामपि संज्ञात्वे बाधकाभावेन विपरिणामेन छांदसत्वेन वा निर्वाहस्यादुक्तत्वात्[36] । तस्मादनुवृत्तिसामर्थ्यात्संज्ञिपरं भविष्यतीति दुर्वचनमिति प्राप्ते ब्रूमः । स्यादेषः दोषो यद्यर्थाधिकार आश्रीयेत । अत्र हि पक्षे गुणवृद्धिशब्दयोः पूर्वत्रसंज्ञात्वे च विनियुक्तत्वादिहापि तद्व्यापारावरूद्धयोः वोपस्थितेः संज्ञापरत्वमेव स्यादिति वक्तुं शब्दाधिकारे त्वनाश्रितार्थ शब्दमात्रं स्वरितत्ववशादनुवर्तते। तेन तु पूर्वत्र क्लृप्तव्यापारोऽपि विवक्ष्यते ।

उपस्थितस्य च तस्य योग्यतादिपरामर्शाद्यथेष्टं विनियोगो भवति । यथा तस्य लोप इत्यत्रेकपदस्यास्य ग्रहणं तु सर्वलोपार्थं न स्थानिनिर्देशार्थमेवमिहापि गुणवृद्धिग्रहणं संज्ञिपरं भविष्यति । तथापि संज्ञापरमेव किं न स्यादुरीत्ये वोच्येत न शब्दाधिकाराश्रयणसामर्थ्यात् । अन्यथापेक्षालक्षणे न लौकिकाधिकारेण तदुपस्थितौ[37] स्वरितत्वकल्पनानुपपत्तेः।

नन्वपेक्षया गुण एव संबध्ये त न वृद्धि रिति चेन्न । समुदायापेक्षायामनन्तसदृशस्येति न्यायानवतारात् । अवयवापेक्षापक्षेऽपि वृद्धिशब्देस्वरूपमात्रे स्वरितत्वं कल्पते लाघवान्नार्यविशिष्टे वंस्तुतस्तु तयोः स्वरितत्वेनैवाधिकारोऽयुक्तः।

अवयवापेक्षायां हि गुणग्रहणमेव संबध्येतानन्तरत्वात् । समुदायापेक्षायां तु वृद्धिग्रहणवददेङादैचोऽपि[38] संबध्येरन् । तत्रायमर्थः स्यात् अदेङ्.मात्रं गुण आदेच्मात्रं वृद्धिरिति प्रागेवोक्तम् इहत्वदेङामादेचावेफ्थानिकानां प्रत्येकं संज्ञाद्वयं विधीयेत। किं कृतं भवति। मजीतीत्यादौ मृजेर्वृद्धिरिति प्राप्तयोरादौ वोरपि गुणत्वान्नाभ्यस्तस्येति निषेधः सिध्यति। तदुच्यते गुणववृद्धेरपि निषेधो ज्ञेय इति तथा ऊर्णोतिः[39] उर्णोति तु सार्वधातुकेति गुणसंज्ञायादैचोऽपि पक्षे सिध्यन्तीति तदर्थमूर्णोतेर्विभाषेति न वक्तव्यं भविष्यति। अस्तु तर्हि लाघवाय[40] तथैवेति चेत् सम् । अनिष्टं तु प्राप्नोति। चकरतुरिति ऋच्छत्यतामिति[41] गुण आकारोऽपि स्यात् । मृजे वृद्धिरकारोऽपि स्यादिति। अतो वृद्धेः स्वरितत्वेनैवानृवृत्तिरिष्टव्यावृत्या ततश्च तयैव स्वपदोपनितः निष्प्रमाणं पुनरिह वृद्धिग्रहणमेव अन्यथा इत्येव सिद्धं साकाङ्क्षत्वाच्च वृद्धिग्रहणमेव प्रकृतंलिङ्ग तथा संभवतः ततो गुण इति पृथक् सूत्रणीयम् । अत्र चेक इति गुण इति च प्रकृतमनुवर्तते गुण इति यो गुणस्तत्रेक इत्युपतिष्ठत इत्यर्थः। अत एव पृथग्योगारम्भादिक इत्यत्रगुणो वर्तिष्यते।

एवं सिद्धे सति पुनर्वृद्धिग्रहणं स्वविशेषणार्थं प्रागीयवृद्धिग्रहणस्येहानुवृत्यर्थं स्वरितत्वं[42] ज्ञापय निपातोपस्थितया निराकाङ्क्षत्वादनन्तरोऽपि गुणो न संबध्येतेति सोऽपि स्वरयितव्यः । ततश्चानयोरपि सिद्धः शास्त्रीयोऽधिकारः ततश्च लौकिकाधिकारादनयोः शब्दाधिकारादिचर्चा इत्यपि न शक्यम् । अपि च पूर्वसूत्रे संज्ञापरत्वेनोपात्तस्यापि वृद्धिगुणशब्दस्यहोपस्थितस्य प्राग्गृहीतसम्बन्धस्मरणे सत्यप्यवश्यं संज्ञिपरत्वमेवोचितं प्रमाणस्वभावात् ।

## शब्दप्राणाण्य विवेचनम् ।

शब्दास्तावत्प्रमाणं सत्तावदेव नार्थं गमयति । यावन्नसहकारिसमवधानम्। व्याप्तस्मृतिदशायामिव धूमः । आलोक विरह इव चक्षुः[43] । शब्देव शक्तिग्रहः सहकारी तस्मिंश्च पूर्ववाक्यादवधृते उत्तरकालं संभृतसामग्रीकत्वेनार्थप्रतीतौ विलम्बे कारणं नास्ति । अन्यथाऽयं गौरित्याक्षेपदेशादवगमतशक्तेरपि[44] गामानयेति श्रुतवतोऽपि गवानयने प्रवृत्तिर्न स्यात् । न चायमन्य एवेति युक्तमर्थपरत्वमयं इह एवानुवर्तते । स च संज्ञापर एवेति वाच्यम् । अनु वृत्ते रपि तज्जातीयशब्दान्तरानुमानरूपत्वेन पूर्वस्मादन्यत्वात् जातिकृताभेदस्योभयत्र तुल्यत्वात्। न चार्थपरत्वेऽन्यत्र मात्रादुच्चरितत्वं तन्त्रम् । तस्य लोप इत्यादावनुवृत्तेः पदादौ व्यभिचारात् गौरवाच्च ।

अतोऽर्थपरत्वस्य औपसर्गिकत्वाच्च रूपपरत्वे परं यतनीयम् । इदमेवाभिसंधायगुणवृद्ध्यधिकारेणैव सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्याच्च संज्ञयाविधाने नियम आश्रितो भाष्ये ।

अन्यथा त्वदुक्तरीत्यानुवर्तमानस्य[45] संज्ञाविधित्वे नोपपत्तेः सामर्थ्यात्संज्ञा प्राप्नोतीत्यपि महाभाष्यानवतार[46] इति वाच्यम्। अर्थाधिकारपक्षावलम्बने नैतत्पूर्वपक्षोपक्षेयात् परिहारान्तरोपन्यासस्य न्यायादुत्पादनार्थत्वात्।

अत एवादेङामितीति प्रतीकमादाय कैयटेन विवृतां पूर्वसूत्रे संज्ञासंज्ञि सम्बन्धायोपात्तो यादृशो वृद्धिशब्दस्तादृश उत्तरत्रानुवर्तनेनैव नोदनीयम्। वृद्धिशब्दोऽनुवर्तमान आदैचः प्रत्याययतीत्यादौ वां गुणसंज्ञा प्राप्नोतीति। यादृशस्तादृश इति। अर्थाधिकारणे स्वरूपपर इत्यर्थः शब्दाधिकारे विपरीतमापादनीयः स्यादिति भावः। किञ्च त्वयाऽपि सिद्धान्ते परिभाषात्वं समर्थ्यते । संज्ञाविधानं च तत्र पुनर्गुणवृद्धिग्रहणमेव यत्नः[47] स च संज्ञापरत्वेऽपि । स्यादेतत् न सामर्थ्य यत्नं ब्रूमः । किन्तु संज्ञापरानुवृत्तगुणवृद्धिग्रहणाभ्यामिह गुणवृद्धयोर्विशेषणाद् गुण इति संज्ञया विधीयमानो गुणो वृद्धिरिति संज्ञया च विधीयमानावृद्धिरिक एव भवतीति संज्ञया विधाने नियमः[48] साध्यत इति । तद्ययमविशेषः । यदनुवर्तमानगुणवृद्धिग्रहणयोरसमस्तयोरेक वचनान्तयोर्द्विवचनान्त समस्तगुणवृद्धिग्रहणविशेषणत्वाभिधानम्।

न हि संभवति देवदत्तयज्ञदत्तौ दण्डी कुण्डलीति। समासे परपदार्थाविभागापन्नयोरिति पदार्थयोर्विशेषणरूपासंभवात्। किञ्चैवं प्रत्येक विशेषणान्वितयोः समासो न स्यात्। सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति भाष्यकारवचनात्। समुदाय विशेषणत्वमपि न संभवति विरुद्धसंख्यावरूद्धत्वेन[49] विरोधात् ।समानाधिकरणस्य यत्ने प्रकृत्यर्थयोरिव प्रत्ययार्थयोरप्यभेदान्वयव्युत्पत्तेः । समुदायस्यैकत्वेऽप्युद्भूतावयवभेदविवक्षया लोपोपजनात्।।

न च वास्तवै कत्वमादाय विशेषणगतै कत्वाभो दोपपत्तिः। पूर्वासंख्यासंख्यान्तरेण मुख्येन गौणेन च बाध्यत इत्यकारवार्तिकोपस्थितत्वात्। गुण इति ये गुणवृद्धि इत्यादिप्रत्येकां विशेषणे च बाधः। प्रत्येक विधानोऽपि समुदायस्याविधानात्। नन्ववयवधर्मेण समुदायस्य व्यपदेशो भविष्यति। यथा युवोरनाकावित्यत्रोच्यते । युश्चासौ समुदायो यु वु लक्षणे वुश्चासाविति। लोकेडिप प्रयुज्यते शुक्लः कृष्णः[50] कृताकृतमित्यादीति चेन्न। तथात्वे हि छत्रिणो गच्छन्ति प्राणमृत उपदधाति मुष्टानुपदधाति प्रथमयोरित्यादिवद् गुणपदेवद्विवचनप्रसंगात्। उद्भूतावयवभेद समुदायपराणामुपचरितपदानां विशेष्यलिङवचनग्राहिता। नियमात्।

न च विशेषणत्वानु पपत्तिः प्रमाणम्। तदेव प्रमाणम्। अयोग्यतापराहतत्वेनतस्यैवासिद्धेः[51]।

अत एव युवोरित्यत्रैकवचनानुपपत्योपचाराश्रितो गत्यन्तरस्यादर्शनात्। न चेहापि तथेति वाच्यम् शब्दाधिकाराश्रयेण संज्ञिलाभे न तदर्थक गुणवृद्धिपदस्य पुनः करणसामर्थ्यस्यैव गत्यंतरत्वात्। अत एव कैयटेन पूर्वस्वारस्यादन्यथा व्याख्यातम्। अन्यथा गुणवृद्धिः मा भून्न ग्रहणे गुणे गुणवृद्धयधिकारादेव सिद्धे पुनर्गुणवृद्धिग्रहणं गुणवृद्धिशब्दव्यापारार्थ विज्ञायत इति।

पूर्व व्याख्यानं तु कथञ्चिदुपचारमाश्रित्य परमते नोक्तं न स्वमतमुपचारकल्पनाया इहासंभवात् क्लिष्टत्वाच्च। अत एव हरदत्तेनापि युवोरित्यत्रापर आहेति मतान्तरत्वं सूचितम्[52]। यत्तु गुणवृद्धियोर्युगपदेकविध गायकं नास्तीति यत्र गुणो विधीयते यत्र वा वृद्धिस्तत्रेक इति पदमुपतिष्ठते इति च वचोद्वयी कल्पते। तत्रानुवर्तमानेन गुणग्रहणे न वृद्धिग्रहणेन चैकवचनान्तेनैकैकं विशेषयितुं शक्यत एव । अत

एवान्यत्रोच्यते। एक: मा भूद् ग्रहणकवाक्याद् वाक्यान्तरा उपप्लवन्त इति। यथा द्वन्द्वश्च प्राणितूर्यसेनाानामित्यत्र प्राण्यानामित्येकं वाक्यं तूर्यानामित्यपरं सेनाजानामित्यपरसंकरनिवृत्यर्थं वाक्यत्रयं कल्प्यते।

किञ्चैकार्थाभावे समासे सत्यपि द्वन्द्वार्थस्यापेक्षितपरस्यावयवरूपस्य प्राधान्याद् विशेषणानुभवने च प्राधान्योपचयाद् राज्ञः[53] पुरूषः शोभन इतिवद् विशेषणयोगो भवत्येव । यदुक्तममित्यादि तदपि प्रत्येकसम्बन्धविवक्षया भवत्येव । यथा गोस्त्रियो रूपसर्जनस्य[54] संज्ञायां ललाट कुक्कुटौ पश्यतीति । तदेतदव्युत्पन्नाभिधानं तथा हि एवं हि वदता श्रूयमाणोस्मिन् सूत्रे तयोरेक वचनान्तयोरूपस्थितिरिष्यते न वा । नाद्यः । अयोग्यत्वेन क्रियानुपपत्तेरनुक्तत्वात्। न द्वितीयः। एतद् विधिव्यापारे स्वसंज्ञयाविधाने नियमासिद्धिप्रसंगेनातिप्रसंगनिवारणात् ।

अथैतस्मिन्नुपस्थितयोरपि तयो नस्वरूपानुपपत्त्यैवैतत्कल्पितवचनयोरेव तयोरनुवृत्तैकवचनान्तयोरेवेत्युच्यते। तत्र पदानां संभूयकारित्वस्य व्युत्पत्तिसिद्धत्वेनैतद् वाक्ये समभिव्याहृतयो वाक्यान्तरे त्वया संभवात् । अथायोग्यस्य त्वादिह तेनोपतिष्ठेते। किन्तु कल्पितयोरेव वाक्ययोरिति चेत् । तत्किमेतद्वाक्यं कुर्यात्[55] । परिभाषेयमिति स्थितत्वान्नियमममिति चेत् । तत्किमविशिष्टं नियच्छति विशिष्टं वा। आद्ये द्यौरित्यादावतिप्रसंगः। अन्त्ये तूक्त एवासंभवः । अथ कल्पिते विशिष्टनियमं करिष्यतः ।

तर्हि वचनद्वयप्रामाण्याद् विशिष्टाविशिष्टनियमयोः षोऽशिग्रहणा ग्रहणवद्विकल्पः स्यात् । अथ प्रत्यक्षविधेः कल्पितविधेश्चैकवाक्यतया एक एव नियमो विधीयते न द्वाविति चेत् । सा किमेकवाक्यतोत्सर्गापवादभावेन कारणविध योरिव विधिनियमविध्योरिव वा। न द्वावपि[56]। असमानविषयत्वात् प्रत्यक्षविधेः समुदायो विषयः कल्पितविध्योस्तु प्रत्येकमिति। किञ्चोत्सर्गोऽधिकविषयत्वे भवति। तन्मात्रविषयत्वे तु व्रीहियववद् विकल्पापक्षे । ततश्च विशिष्टापवाद विषयादन्यत्रापि क्वचिदुत्सर्ग: प्र वर्तितव्यमिति द्यौरित्यादावविशिष्टोऽपि नियमः क्वचित् प्रवर्तेतेति प्रयोगानिष्टतापत्तिः ।

ननूक्तमेतत् गुणवृद्धयोरेंकं विधायकं नास्तीति यत्र गुणो विधीयते यत्र वा वृद्धिस्तत्रेक इत्युपतिष्ठत इति वचो द्वयी कल्पते । तत्रानुवर्तमानयोः प्रत्येक संबंध इति चेत् । तत्किमेतत् बोधक सेवा ओमिति चेत् ।

तन्महताकण्ठरवेणोक्तताामनर्थकमेतत्सूत्रमिति। तदप्यो कुर्वतस्तत्र वाक्यं वर्णं नाप्यनर्थकं भवितुमिति भाष्यव्याकोपः सूत्रयथेष्टं विनियोगो भवति । यथा तस्य लोप इत्यत्रेत्पदस्याङ्स्य ग्रहणं तु सर्वलोपार्थं न स्थानिनिर्देशार्थमिवमिहापि गुणवृद्धिग्रहणं संज्ञिपरं भविष्यति। तथापि संज्ञापरमेव किं न तस्य । न शब्दाधिकाराश्रयणसामर्थ्यात्। अन्यथापेक्षा लक्षणे न लौकिकाधिकारेण तदुपस्थितौ स्वरितत्वकल्पनानुपपत्तेः ।

नन्वपेक्षया गुण एव संबध्येत न वृद्धिरिति चेन्न। समुदायापेक्षायामनन्त सदृशस्येति न्यायानवतारात् । अवयवापेक्षापक्षेऽपि वृद्धिशब्दे स्वरूपमात्रे स्वरितत्वं कल्पते। लाघवान्नार्यविशिष्टे: वस्तुतस्तु तयोः स्वरितत्वेनैवाधिकारोऽयुक्तः । अवयवापेक्षायां हि गुणग्रहणमेव संबध्येतानन्तरत्वात्। समुदायापेक्षायां तु वृद्धिग्रहणवददेड.दैचोऽप संबध्येरन्। तत्रायमर्थः, स्यात् । अदेड्. मात्रं गुण आदैच् मात्रं वृद्धिरिति प्रागेवोक्तं इह त्वदेड.मादेचां चेक्स्थानिकानां प्रत्येक संज्ञाद्वयं विधीयेत किं कृतं भवति। मर्मुजतीत्यादौ मृजेर्वृद्धि[57] रिति प्राप्तयोरादौ गुणत्वान्नाभ्यस्तस्येति निषेधः सिध्यति। तदुच्यते गुणववृद्धेरपि निषेधो ज्ञेय ऊर्णोति ऊर्णोति तु इति तथा सार्वधातुकेति

गुणसंज्ञायादैचोऽपि पक्षेसिध्यन्तीति तदर्थमूर्णोतेर्विभाषेति[58] न वक्तव्यं भवति। अस्तु तर्हि लाघवाय तथैवेति चेत् । अनिष्टं तु प्राप्नोति। चकरतुरिति ऋच्छत्यृतामिति[59] गुण आकारोऽपि स्यात् । मृजेवृद्धिरकारोऽपि स्यादिति । अतो वृद्धेः स्वरितत्वेनैवानुवृत्तिरिष्टः ततश्च तयैव स्वपदोपनित निष्प्रमाणं पुनरिह वृद्धिर्ग्रहणमेव । अन्यथा इत्येव सिद्धे ।

साकाङ्क्षत्वाच्च वृद्धिग्रहणमेव प्रकृतंलिङ तथा संभवतः । ततो गुणइति पृथक् सूत्रणीयम् । अत्र चेक इति गुण इति च प्रकृतमनुवर्तते गुण इतियोगुणरतत्रेक इत्युपपत्तिष्ठत इत्यर्थः ।

अत एव पृथग्योगारम्भादिक इत्यत्रानन्तरोऽपि गुणो न वर्तिष्यते। एवं सिद्धे सति पुनर्वृद्धिग्रहणं स्वविशेषणार्थं प्रागीय वृद्धिग्रहणस्येहानुवृत्यर्थं स्वरितत्वं ज्ञापय निपातोपस्थितया निराकांक्षत्वादनन्तरोऽपि गुणो न सम्बध्येतेति सोऽपि स्वरयितव्यः। ततश्चानयोरपि सिद्धः शास्त्रीयोऽधिकारः। ततश्चलौकिका धिकारादनयोः शब्दाधिकारादि चर्चा न शंक्यम् । अपि च पूर्वसूत्रे संज्ञापरत्वेनोपात्तस्यापि वृद्धिग्रहणगुणशब्दस्येहोपस्थितस्य प्राग्गृहीतसम्बन्धस्मरणे सत्यपि अवश्यं संज्ञिपरत्मेवोचितम् । प्रमाणस्वभावात् । शब्दास्तावत्प्रमाणं सत्तावदेव नार्थे गमयति । यावन्नसहकारि समवधानम् । व्याप्तस्मृति दशायामिव धूमः । आलोक विरह इव चक्षुः[60] । शब्देव शक्तिग्रहः सहकारी तस्मिंश्च पूर्ववाक्यादवधृते उत्तरकालं संभृतसामग्रीकत्वेनार्थ प्रतीतौ विलम्बे कारणं नास्ति । अन्यथाऽयं गौरित्याक्षेपदेशादवगमत शक्तेरपि गामानयेति श्रुतवतोऽपि गावानयने प्रवृत्तिर्न स्यात् । न चायमन्य एवेति युक्तमर्थ परत्वमयं स एवानुवर्तते। स च संज्ञापर एवेति वाच्यम् । अनुवृत्तेरपि तज्जातीयशब्दान्तरानुमानरूपत्वे न पूर्वस्मदन्यत्वात्। जातिकृताभेदस्योभयत्र तुल्यत्वात् । न चार्थपरत्वेऽन्यत्र मात्रादुच्चरितत्वं तन्त्रम् । तस्यलोप इत्यादावनुवृत्तेः पदादौ व्यभिचारात् गौरवाच्च । 1

न चैतानि विधायकानि अनुवादरूपत्वात् ग्रहणकवाक्यानर्थक्यापत्तेश्च । न चैवं संकरप्रसंगः । आश्रितबहुत्वसंख्याविशेषस्याङशब्दस्य प्रत्येकसम्बन्धविविक्षया प्राण्यानां प्राण्यगर्यो द्वन्द्व इत्येवं रूपाणामेवावयवार्थानां द्वन्द्वेनोपसंगृहीतत्वात् । तथा भूतानामेव चोत्त्रत्रोपप्लुतवाक्यैर्विवरणात् । अन्यथा द्वन्द्ववाक्यसंगृहीतार्थ प्रतिपादकत्वे मीमांसावशाद्[61] । कल्पनोपसंख्यानता वा प्रसज्येत । न तु तथापि गुणवृद्धयोः द्वन्द्वेन सहभूतयोरेव लिडत्वमिक् पदोपस्थानं प्रति बोध्यते न च द्वयोरेकं विधायकमस्तीति सर्वथाऽवबोधकमेव महावाक्यमिति चेत् । मैवं द्वेधा हि संज्ञापरिभाषे विधानुपतिष्ठते व्यक्तिपक्षे। प्रति सूत्रमाकृति पक्षे तु सकृदेव समुदायो तत्राद्ये साहित्यस्योद्देश्यविशेषणत्वेनाविवक्षितत्वात्प्रत्येक लिङतोपपत्तिः ।

न चैकार्थीभावापन्नयोर्गुणवृद्धिपदार्थयोर्भेदानुपलम्भात् कथं प्रत्येकं लिडतेति शंक्यम् । द्वन्द्वे भेदाश्रवणेऽपि विग्रहवाक्यगतस्य तस्य वृद्धौ परिवर्तमानत्वात् । कथमन्यथा तस्थस्थमिपां तांतंतामः[62] पाघ्रेत्यादौ[63] द्वन्द्वनिर्दिष्टे यथासंख्यस्य प्रत्येक वाक्यपरिसमाप्तिश्च स्यात् ।

अत्र हि पक्षे यथा मिदेर्गुणः[64] शीङःसार्वधातुकेगुण[65] इत्यादि अनेकेषु गुणविधिषु प्रत्ये कमियं परिभाषोपतिष्ठते । यथा च मृजेर्वृद्धिः[66] सिचिवृद्धिरित्यादिष्वने[67] केषु वृद्धिविधिषु प्रत्ये कमियमुपतिष्ठते तथा द्वन्द्वोपगृहीतयोर्गुणवृद्धद्योरपि प्रत्येकं प्रवर्तिष्यते ।

तथा च गुणवृद्धिसंज्ञे द्वन्द्वनिर्दिष्टयोरप्यदेङादैचोः प्रत्येकं प्रवर्तते । यदि तु तत्र लक्ष्ये समुदायस्य प्रयोगोनास्तीति साहित्यस्याविवक्षया प्रत्येकं संज्ञिता तदिहापि समुदायस्यैकं विधायकं नास्ति इति सामर्थ्यादेव प्रत्येकं लिङ्ता भविष्यतीति न विशेषः कश्चित् ।

न च अनया रीत्या प्रत्ये कं विशेषणयो गोऽपि सुशक्तः । पदार्थैकदेशभूतयोस्तयोर्विशेष्यत्वासंभवस्योपकृतत्वात्[68] तु प्रत्येकावयवलक्षणपक्षे नास्ति पदार्थैकदेशतेति चेन्न। तथापि स्वार्थवृत्तेरपि समासैकदेशस्य घट: कर्मत्वमानयनं कृतिरिति च स्वरूपयोग्यत्वान्न विशेषणान्वयः संभवति ।

अत एव येषामजहस्वार्थावृत्तिः परार्थाभिधानं च नास्तीति मतन्तेऽपि राज्ञः पुरूष इति वाक्यादविशिष्टेऽपि राजपुरूष इति समासे ऋद्धादिविशेषणान्वयमुपसर्जनेन इच्छन्ति तत्र को हेतु[69] स्वरूपयोग्यत्वादेव[70] राजपुरूषः शोभन इत्यादावपि विशिष्टेनैव शोभनान्वयः एकविशेषणान्विते परविशेषणान्वयात् न तु तत्र निकृष्य राजमात्रेण । एवमुभयपदार्थप्रधानोऽपि द्वन्द्वेनावयवाभ्यां विशेषणान्वयो नाभिधानात्। द्वितीये तु पक्षे नालोचितविशेषे गुणवृद्धिपदोपेते प्रागुदाहृतयावच्छाब्दसमुदाय एव समुदायरूपमेव लिङ दृष्ट्वा सकृदेवैषा परिभाषोपस्थायेक् पदं सर्वेषु विधिष्वेकप्रसरेणैवोपस्थापयति। दीपज्वाले वाप्रतिहतसकलविषया च भासितमालोकम् ।

यदुक्तं भाष्ये लक्षणं हि नाम भ्रमति मुहूर्तमपि नावतिष्ठत इति तस्मात् द्वयोरेकं विधायकं नास्तीत्यनुपपत्त्याकल्पित वचो द्वैप्यामनुवृत्तयोर समस्तयोरप्यन्वयो भविष्यतीत्याशा मोदकमात्रमेतत् ।

कल्पिकाया अनुपपत्तेरेवाभावस्योपपादितत्वात् । यदपि किञ्चेत्याधुक्तं तदप्यसत् । द्वन्द्वार्थो हि न वाक्यवद् विशकलितं द्वयं युगपदधिकरणवचने द्वन्द्व इति वचनात्।

कल्पिकाया अनुपपत्तेरेवाभावस्योपपादितत्वात् । यदपि किञ्चेत्याधुक्तं तदप्यसत्। द्वन्द्वार्थो हिन वाक्यवद् विशकलितं द्वयं युगपदधिकरणवचने द्वन्द्व इति वचनात् । अपेक्षितपरस्परावयवरूपस्येति तस्यापांसूदकवदविकृतस्वरूपस्य समुदायरूपस्य वा न केवलेन गुणपदेन वृद्धिपदेन वा विशेषणानुभवः संभवति दूरे प्राधान्योऽवयवप्रत्याशा राज्ञः पुरूषः[71] शोभनो राजपुरूषः शोभन इत्यत्र तु समासे व्याप्तेन राजैव प्राधानं तत्र विशिष्टेऽपि विशिष्टे वा विशेषणान्वयो न विरूध्यत इति दृष्टान्तोऽपि विषमः ।

यदप्युकृमंगदी कुण्डली देवदत्तयज्ञदत्तावित्येतदपि प्रत्येकसम्बन्धविषयतया भवत्येवेति । तदपि प्रतिज्ञामात्रं न ह्यत्र का विद्युक्तियुत्पत्तिर्वा लोकसिद्धास्ति। अतो नाभिधानान्नैष प्रयोग: साधुः। अवयवलक्षणमपेक्षेऽपि समासेऽवयवानां विशेषणान्वयं प्रतिस्वरूपायो ग्यत्वादित्युक्तत्वात् । यदप्यु दाहृतं गौस्त्रियोरूपसर्जनस्य[72] संज्ञायां ललाटकुक्क्वद्यौ पश्यतीति। तदपि युक्ति बाधित्वाद्विवचनविपरिणामेन शाब्दमन्वयं बोधयति । एकवचनप्रयोगस्त्वर्थमन्वयमभिप्रेत्य लाघवार्थं तावतापि प्रयोगसाधतोपपत्तेरिति गमनीयं प्रकारान्तरेण गत्यसंभवात् । अत एव स्थले स्थले वचनादि[73] परिणाम व्याचक्षते व्याख्यातारः।

यत्त्वस्य विधित्वबाधनाय केचिदुचुः । स्वतन्त्रविधिपक्षे सर्वेषां गुणवृद्धिविधायकानां नियमार्थत्वं वाच्यं गुण एव न वृद्धिर्वृद्धिरेव न गुण इति । एवञ्च मिदेर्गुण[74] इत्यनर्थकं लघूपधलक्षणस्य गुणस्य क्ङिति चेति[75] प्रतिषेधे प्राप्ते प्रतिप्रसवार्थं क्रियते। विधित्वे त्वस्यानन्तरस्य विधिर्वा

भवति प्रतिषेधो वेत्यनेनैव प्राप्तयोर्गुणवृद्धयोरयं निषेध इति लघूपघलक्षणेनैव सिद्धत्वादनर्थकं मिदेर्गुणवचनं ज्ञापयति नायं विधिरिति। विधित्वाभावे त्विकपदोपस्थानस्य निषेद्धुमशक्यत्वात् सामान्याकारेण येन मिद्विहितयोर्गुणवृद्धयोर्निषेध इति सार्थक तदिति। तन्न। अस्य विधित्वेऽन्येषां यदिति यमार्थत्वं तदा लघूपधगुणेनैव सिद्धत्वादित्यभिधानव्याप्रातः । तथा चास्यैव सर्वत्र विधायकत्वे मिदेर्गुणोऽप्यनेनैव प्राप्त एतद्विषयेण क्ङि.ति चेति सिद्ध इति प्रतिप्रसवस्यावश्यकत्वात् । किञ्चानेन पर्यायेण गुणवृद्धयोः प्रसक्तौ मिदेर्गुण एव न वृद्धिरिति नियमार्थमेतदपि स्यात्।

यत्तु पुगन्त[76] न लघूपधनियमेनैवान्यथा सिद्ध तदिति। तन्न। पुगन्तलघूपधस्यैव गुण इति नियममपेक्षते नास्यासिद्धेः । अपि च लघूपध गुणादीनां नियमार्थत्वं वदता तेषां विषयत्वं वाच्यम् ।

भिन्नविषयत्वेन तदनुपपत्तेः एवं चानिको इत्यस्य गुणविध्यर्थमेतत्स्यात् । एवम् अलोन्त्यपरिभाषाप्यनुगृहीता[77] भवति। न चानयैव दिशा पुगन्तलघूपधगुणस्याप्यनिकिविधानार्थत्वसंभवेन नियमार्थत्वानुपपत्तेः मिदन्त्यव्यञ्जनस्यापि तेनैव सिद्धत्वात्सुतरामानर्थक्यमेवायातमिति वाच्यम् । पुग्यन्तो लघो उपधेति तत्पुरूषाड़ीकारेण व्यञ्जने प्रवृत्तेः । न चास्य विधित्वे सकलगुणवृद्धिविधिषु इक पदोपस्थानस्य नियमत्वसंपन्नये कैयटेनोक्तत्वान्न मिदेर्गुणोऽन्त्यविध्यर्थ इति वाच्यम्। विधिपरिभाषा चेति पक्षे कैयटेन तथाभिधानात् । केवलविधित्वपक्षेऽन्त्यविध्यर्थत्वे बाधकाभावात् । यद्येवमनिगर्थता संभवात् पुगन्तेत्यपि नियमार्थ स्यादिति चेत् । न तत्पुरूष पक्षे तत्संभवस्योपकृतत्वात् । बहुव्रीहिपक्षेऽपि समयान्वयापनायामित्यादि निर्देशात्पुगन्तगुणादेरनिको प्रसंगात् ।

सन्दर्भ ग्रन्थाः


1. अभ मूल पाडे अस्ति। छ.न्दोदृष्ट्या सूत्र व्याख्यामि यत्नेन' इति भुक्तम् ।
2. छे च (अ 6.1.73)
3. हनोवध लिडि. (अ. 2.4.42)
4. लुडि. च (अ. 2.4.43)
5. 'षष्ठी हेतु प्रयोगे' (अष्टा – 2.3.26)
6. 'अस्तेर्भूः (अष्टा – 2.4.52)
7. 'ब्रवो वचिः (अष्टा – 2.4.53)
8. ब्रुवो सवि इति असाधुः, ब्रुवो वचि साधुः ।
9. 'चक्षिड्. ख्या' (अष्टा – 2.4.54)
10. मूलपाठे वक्षिड्. ख्यात्रिति असाधुः चक्षिड्. ख्यामिति साधुः।
11. 'एकाचो द्वे प्रथमस्य'. (अष्टा – 6.1.9)
12. लिटि धातोरनभ्यासस्य (अष्टा – 6.1.8)

13. सन्यङोः (अष्टा – 6.1.9)

14. ‘चङि' (अष्टा – 6.1.11)

15. एकाचो द्वे प्रथमस्य (अष्टा - 6.1.1)

16. मूलपाठे कौवल्याभाव इति असाधुः कैवल्याभाव इति साधुः।

17. मूलपाठे व्याभिचारः असाधुः व्यभिचारः साधुः।

18. मूलपाठे निर्दिशेदिर्थः असाधुः निर्विशेदित्यर्थः साधुः।

19. मूलपाठे यतिरेनी असाधुः व्यतिरेकी साधुः।

20. मूलपाठे स्वनूप इति असाधुः, स्वरूप इति साधुः।

21. मृजेर्वृद्धिः (अष्टा - 7.2.114)

22. एकाचो वे प्रथमस्य (अष्टा – 6.1.1)

23. मूलपाठे यद्ययमधिकानः इति असाधुः यद्ययमधिकारः साधुः।

24. मूलपाठे सुचनितार्थत्वादिति असाधुः सुचरितार्थत्वादिति साधुः।

25. मूलपाठे व्यतिनेके इति असाधुः व्यतिरेके इति साधुः।

26. मूलपाठे अन्यथानुवर्तमानुणवृद्धिग्रहणाभ्यासमेवेको असाधुः अन्यथानुवर्तमानगुणवृद्धिग्रहणाभ्यामेवेको साधुः।

27. 'हलन्त्यम्' (अष्टा – 1.3.3)

28. मूलपाठे वावनिकः असाधुः वाचनिकः साधुः।

29. मूलपाठे मदसो मात् असाधुः अदसो मात् साधुः।

30. षः प्रत्ययस्य (अष्टा – 1.3.6)

31. मूलपाठे समभिव्याहावक्षायामिक असाधुः समभिव्याहाराकांक्षायामिक साधुः।

32. मूलपाठे परसाहवर्यं असाधुः परसाहचर्य साधुः।

33. पुरस्तादपवादाः अनन्तरान् विधीन् वाधन्ते नोत्तरान्।

34. मूलपाठे प्रमाणमुपनुणद्धि असाधुः प्रमाणमुपरूणद्धि साधुः।

35. मूलपाठे न स्याविति असाधुः न स्यादिति साधुः।

36. मूलपाठे स्यायुक्तत्वात् इति असाधुः स्यादुक्तत्वात् साधुः।

37. मूलपाठे तुदुपस्थितौ असाधुः तदुपस्थितौ साधुः।

38. मूलपाठे वृद्धिग्रहणवददेडादैवोपि असाधुः वृद्धिग्रणवददेड.दैचोऽप साधुः।

39. 'ऊर्णोतेर्विभाषा' (अष्टा - 7.2.6)

40. मूलपाठे लाघवाघ असाधुः, लाघवाय साधुः ।

41. 'ऋच्छत्यृताम्' (अष्टा – 7.4.11) .

42. मूलपाठे स्वनितत्वमसाधुः, स्वरितत्वम् साधुः ।

43. मूलपाठे वक्षुः इति असाधुः, चक्षुः इति साधुः।

44. मूलपाठे देशादवगगतशक्तेरपि असाधुः देशादवगमतशक्तेरपि साधुः ।

45. मूलपाठे अनुवर्ततेमानस्य असाधुः, अनुवर्तमानस्य साधुः ।

46. मूलपाठे मभाष्यानवतार इति असाधुः महाभाष्यानवतार साधुः ।

47. मूलपाठे यत्र असाधुः, यत्नः साधुः।

48. मूलपाठे तियमः असाधुः, नियमः साधुः ।

49. मूलपाठे विनद्धसंख्यावनुद्धत्वेन असाधुः । विरूद्धसंख्यावरूद्धत्वेन साधुः ।

50. मूलपाठे कृक्लः इति असाधुः । कृष्णः इति साधुः ।

51. मूलपाठे वस्यैवासिद्धेः असाधु । तस्यैवासिद्धे इति साधुः ।

52. मूलपाठे सूवितम् इति साधुः, सूचितं साधुः ।

53. मूलपाठे राजः इति असाधुः राज्ञः इति साधुः ।

54. गोस्त्रियोरूपसर्जनस्य' (अष्टा – 2.2.48)

55. मूलपाठे कुर्सात् इति असाधुः । कुर्यात् इति साधुः ।

56. मूलपाठे वाचपि असाधुः द्वावपि इति साधुः ।

57. 'मृजेवृद्धिः (अष्टा – 7.2.124)

58. ऊर्णोतेर्विभाषा (अष्टा – 7.2.6)

59. ऋच्छत्यृताम् (अष्टा – 7.4.11)

60. मूलपाठे वक्षुः असाधुः, चक्षुः साधुः ।

61. मूलपाठे मीषमाशाद् इति असाधुः, मीमांसावशाद् इति साधुः।

62. 'तस्थस्थमिपां तांतंतामः' (अष्टा – 3.4.101)

63. 'पाघ्रामास्थाम्नादाण्दृश्यतिसर्तिसद्शदांपिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः (अष्टा - 7.3.78)

64. 'मिर्गुण' (अष्टा – 7.3.82)

65. 'शीङः सार्वधातुके गुणः' (अष्टा – 7.4.21)

66. 'मृजेर्वृद्धिः (अष्टा – 7.4.114)

67. 'सिचि वृद्धिपरस्मैपदेषु (अष्टा – 7.2.1)

68. मूलपाठे संभवस्योकृत्वात् असाधुः । संभवस्योपकृतत्वात् साधुः ।

69. 'मूले तत्कः हेतोः इति पाठः आसीत् । तन्न समीचीनम् ।

70. मूलपाठे स्वनुपायोग्यत्वादेव असाधुः । स्वरूपयोग्यत्वदेव साधुः ।

71. मूलपाठे राज्ञः पुनुषः असाधुः, राज्ञः पुरूषः साधुः ।

72. गोस्त्रियोरूपसर्जनस्य (अष्टा – 1.2.48)

73. मूलपाठे ववनदि असाधुः, वचनादि साधुः ।

74. मिदेर्गुणः (अष्टा – 7.3.82)

75. 'विङति' (अष्टा - 1.1.5)

76. मूलपाठे युगं इति असाधुः, पुगन्त साधुः ।

77. 'अलोन्त्यस्य' (अष्टा – 1.1.52)